श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

कृष्णयजुर्वेदीय तैत्तिरीय ब्राह्मणे

# ॥ तृतीयाष्टके एकादशः प्रश्नः ॥

## (काठकम् - २)

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ तृतीयाष्टके एकादशः प्रश्नः ॥
## (काठकम् - २)

हरिः ओ(४)म्।
लो॒को॑ऽसि स्व॒र्गो॑ऽसि।
अ॒न॒न्तो᳚ऽस्यपा॒रो॑ऽसि।
अक्षि॑तोऽस्यक्ष॒य्यो॑ऽसि।
तप॑सः प्रति॒ष्ठा।
त्वयी॒दम॒न्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वग्ं॑ सु॒भू॒तम्।
विश्व॑स्य भ॒र्ता विश्व॑स्य जनयि॒ता।
तं त्वोप॑दधे काम॒दुघ॒मक्षि॑तम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ 1॥

तपो॑ऽसि लो॒के श्रि॒तम्।
तेज॑सः प्रति॒ष्ठा।
त्वयी॒दम॒न्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वग्ं॑ सु॒भू॒तम्।
विश्व॑स्य भ॒र्तृ विश्व॑स्य जनयि॒तृ।

Please let us know of any errors in this text.

तत्त्वोप॑दधे काम॒दुघ॒मक्षि॑तम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ 2॥

तेजो॑ऽसि॒ तप॑सि श्रि॒तम्।
स॒मु॒द्रस्य॑ प्रति॒ष्ठा।
त्वयी॒दम॒न्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वग्ं॑ सुभू॒तम्।
विश्व॑स्य भ॒र्तृ विश्व॑स्य जनयि॒तृ।
तत्त्वोप॑दधे काम॒दुघ॒मक्षि॑तम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ 3॥

स॒मु॒द्रो॑ऽसि॒ तेज॑सि श्रि॒तः।
अ॒पां प्र॑ति॒ष्ठा।
त्वयी॒दम॒न्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वग्ं॑ सुभू॒तम्।
विश्व॑स्य भ॒र्ता विश्व॑स्य जनयि॒ता।
तं त्वोप॑दधे काम॒दुघ॒मक्षि॑तम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ 4॥

आपः॑ स्थ समु॒द्रे श्रि॒ताः।
पृ॒थि॒व्याः प्र॑ति॒ष्ठा यु॒ष्मासु॑।
इ॒दम॒न्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वग्ं॑ सु॒भूतम्।
विश्व॑स्य भ॒र्त्र्यो॑ विश्व॑स्य जनयि॒त्र्यः॑।
ता व॒ उप॑दधे काम॒दुघा॒ अक्षि॑ताः।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ 5॥

पृ॒थि॒व्य॑स्य॒प्सु श्रि॒ता।
अ॒ग्नेः प्र॑ति॒ष्ठा।
त्वयी॒दम॒न्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वग्ं॑ सु॒भूतम्।
विश्व॑स्य भ॒र्त्री विश्व॑स्य जनयि॒त्री।
तां त्वोप॑दधे काम॒दुघा॒मक्षि॑ताम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ 6॥

अ॒ग्निर॑सि पृथि॒व्याग् श्रि॒तः।
अ॒न्तरि॑क्षस्य प्रति॒ष्ठा।
त्वयी॒दम॒न्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वग्ं॑ सु॒भूतम्।

विश्व॑स्य भ॒र्ता विश्व॑स्य जनयि॒ता।
तं त्वोप॑दधे काम॒दुघ॒मक्षि॑तम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ 7॥

अ॒न्तरि॑क्षमस्य॒ग्नौ श्रि॒तम्।
वा॒योः प्र॑ति॒ष्ठा।
त्वयी॒दम॒न्तः।
विश्वं᳚ य॒क्षं विश्वं᳚ भू॒तं विश्व॑ग्ं सु॒भू॒तम्।
विश्व॑स्य भ॒र्तृ विश्व॑स्य जनयि॒तृ।
तत्त्वोप॑दधे काम॒दुघ॒मक्षि॑तम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ 8॥

वा॒युर॑स्य॒न्तरि॑क्षे श्रि॒तः।
दि॒वः प्र॑ति॒ष्ठा।
त्वयी॒दम॒न्तः।
विश्वं᳚ य॒क्षं विश्वं᳚ भू॒तं विश्व॑ग्ं सु॒भू॒तम्।
विश्व॑स्य भ॒र्ता विश्व॑स्य जनयि॒ता।
तं त्वोप॑दधे काम॒दुघ॒मक्षि॑तम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ 9॥

द्यौर॑सि वा॒यौ श्रि॒ता।
आ॒दि॒त्यस्य॑ प्रति॒ष्ठा।
त्वयी॒दम॒न्तः।
विश्वं᳚ य॒क्षं विश्वं᳚ भू॒तं विश्व॑ग्ं सुभू॒तम्।
विश्व॑स्य भ॒र्त्री विश्व॑स्य जनयि॒त्री।
तां त्वोप॑दधे काम॒दुघा॒मक्षि॑ताम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ **10**॥

आ॒दि॒त्यो॑ऽसि दि॒वि श्रि॒तः।
च॒न्द्रम॑सः प्रति॒ष्ठा।
त्वयी॒दम॒न्तः।
विश्वं᳚ य॒क्षं विश्वं᳚ भू॒तं विश्व॑ग्ं सुभू॒तम्।
विश्व॑स्य भ॒र्ता विश्व॑स्य जनयि॒ता।
तं त्वोप॑दधे काम॒दुघ॒मक्षि॑तम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ **11**॥

च॒न्द्रमा॑ अस्यादि॒त्ये श्रि॒तः।
नक्ष॑त्राणां प्रति॒ष्ठा।
त्वयी॒दम॒न्तः।
विश्वं᳚ य॒क्षं विश्वं᳚ भू॒तं विश्व॑ग्ं सुभू॒तम्।

विश्व॑स्य भ॒र्ता विश्व॑स्य जनयि॒ता।
तं त्वोप॑दधे काम॒दु॒घ॒मक्षि॑तम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ **12**॥

नक्ष॑त्राणि स्थ च॒न्द्रम॑सि श्रि॒तानि॑।
सं॒व॒थ्स॒रस्य॑ प्रति॒ष्ठा यु॒ष्मासु॑।
इ॒दम॒न्तः।
विश्वं᳚ य॒क्षं विश्वं᳚ भू॒तं विश्व॑ग्ं सु॒भू॒तम्।
विश्व॑स्य भ॒र्तॄणि॒ विश्व॑स्य जनयि॒तॄणि॑।
तानि॑ व॒ उप॑दधे काम॒दु॒घा॒न्यक्षि॑तानि।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ **13**॥

सं॒व॒थ्स॒रो॑ऽसि॒ नक्ष॑त्रेषु श्रि॒तः।
ऋ॒तू॒नां प्र॑ति॒ष्ठा।
त्वयी॒दम॒न्तः।
विश्वं᳚ य॒क्षं विश्वं᳚ भू॒तं विश्व॑ग्ं सु॒भू॒तम्।
विश्व॑स्य भ॒र्ता विश्व॑स्य जनयि॒ता।
तं त्वोप॑दधे काम॒दु॒घ॒मक्षि॑तम्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ **14**॥

ऋतवः स्थ संवथ्सरे श्रिताः।
मासानां प्रतिष्ठा युष्मासु।
इदमन्तः।
विश्वं यक्षं विश्वं भूतं विश्वग्ं सुभूतम्।
विश्वस्य भर्तारो विश्वस्य जनयितारः।
तान् व उपदधे कामदुघानक्षितान्।
प्रजापतिस्त्वा सादयतु।
तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद॥ **15**॥

मासाः स्थर्तुषु श्रिताः।
अर्धमासानां प्रतिष्ठा युष्मासु।
इदमन्तः।
विश्वं यक्षं विश्वं भूतं विश्वग्ं सुभूतम्।
विश्वस्य भर्तारो विश्वस्य जनयितारः।
तान् व उपदधे कामदुघानक्षितान्।
प्रजापतिस्त्वा सादयतु।
तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद॥ **16**॥

अर्धमासाः स्थ मासु श्रिताः।
अहोरात्रयोः प्रतिष्ठा युष्मासु।
इदमन्तः।
विश्वं यक्षं विश्वं भूतं विश्वग्ं सुभूतम्।

sunder kidambi prapatti dot com sunder kidambi

विश्व॑स्य भ॒र्तारो॒ विश्व॑स्य जनयि॒तार॑ः।
तान् व॒ उप॑दधे काम॒दुघा॒नक्षि॑तान्।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ **17**॥

अ॒हो॒रा॒त्रे स्थो᳚ऽर्धमा॒सेषु॑ श्रि॒ते।
भू॒तस्य॑ प्रति॒ष्ठे भव्य॑स्य प्रति॒ष्ठे।
यु॒वयो॑रि॒दम॒न्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वग्ं॑ सुभू॒तम्।
विश्व॑स्य भ॒र्त्र्यौ᳚ विश्व॑स्य जनयि॒त्र्यौ᳚।
ते वा॒मुप॑दधे काम॒दुघे॒ अक्षि॑ते।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ **18**॥

पौ॒र्ण॒मा॒स्यष्ट॑काऽमावा॒स्या᳚।
अ॒न्ना॒दाः स्था᳚न्न॒दुघो॑ यु॒ष्मासु॑।
इ॒दम॒न्तः।
विश्वं॑ य॒क्षं विश्वं॑ भू॒तं विश्वग्ं॑ सुभू॒तम्।
विश्व॑स्य भ॒र्त्र्यो॑ विश्व॑स्य जनयि॒त्र्य॑ः।
ता व॒ उप॑दधे काम॒दुघा॒ अक्षि॑ताः।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ **19**॥

राडंसि बृहती श्रीरसीन्द्रंपत्नी धर्मपत्नी।
विश्वं भूतमनुप्रभूंता।
त्वयीदमन्तः।
विश्वं यक्षं विश्वं भूतं विश्वगं सुभूतम्।
विश्वंस्य भर्त्री विश्वंस्य जनयित्री।
तां त्वोपंदधे कामदुघामक्षिंताम्।
प्रजापंतिस्त्वा सादयतु।
तया देवतंयाऽङ्गिरस्वद्ध्रुवा सींद॥ **20** ॥

ओजोंऽसि सहोंऽसि।
बलंमसि भ्राजोंऽसि।
देवानां धामामृतंम्।
अमंर्त्यस्तपोजाः।
त्वयीदमन्तः।
विश्वं यक्षं विश्वं भूतं विश्वगं सुभूतम्।
विश्वंस्य भर्ता विश्वंस्य जनयिता।
तं त्वोपंदधे कामदुघमक्षिंतम्।
प्रजापंतिस्त्वा सादयतु।
तया देवतंयाऽङ्गिरस्वद्ध्रुवा सींद॥ **21** ॥

लोकस्तपस्तेजंस्समुद्र आपंः पृथिव्यंग्निरन्तरिंक्षं वायुर्द्यौरांदित्यश्चन्द्रमा नक्षंत्राणि संवथ्सर ऋतवो मासां अर्धमासा अंहोरात्रे पौर्णमासी राडुस्योजोऽस्येकंविगंशतिः॥ **1** ॥

लो॒कों॑ऽसि भ॒र्ता तम्।
त॒प॒स्तेजों॑ऽसि भ॒र्तृ तत्।
स॒मु॒द्रों॑ऽसि भ॒र्ता तम्।
आपं॑स्स्थ भ॒र्त्र्य॑स्ता वः॑।
पृ॒थि॒वी भ॒र्त्री ताम्।
अ॒ग्निर॑सि भ॒र्ता तम्।
अ॒न्तरि॑क्षं भ॒र्तृ तत्।
वा॒युर॑सि भ॒र्ता तम्।
द्यौर॑सि भ॒र्त्री ताम्।
आ॒दि॒त्यश्च॒न्द्रमा॑ भ॒र्ता तम्।
नक्ष॑त्राणिस्थ भ॒र्तॄ॒णि॒ तानि॑ वः।
सं॒व॒थ्स॒रो॑ऽसि भ॒र्ता तम्।
ऋ॒तवो॒ मासा॑ अर्धमा॒सा भ॒र्तारो॑ भ॒र्तारो॑ भ॒र्तार॒स्तान् वः॑।
अ॒हो॒रा॒त्रे भ॒र्त्र्यौ॑ ते वा॑म्।
पौ॒र्ण॒मा॒सी भ॒र्त्र्य॑स्ता वः॑।
रा॒ड॑सि भ॒र्त्री ताम्।
ओजों॑ऽसि भ॒र्ता तमेक॑विग्ंशतिः॥

त्वम॑ग्ने रु॒द्रो असु॑रो म॒हो दि॒वः।
त्वग्ं शर्धो॒ मारु॑तं पृ॒क्ष ई॑शिषे।
त्वं वातै॑ररु॒णैर्या॑सि शङ्ग॒यः।
त्वं पू॒षा वि॑ध॒तः पा॑सि॒ नु त्मना॑।
देवा॑ दे॒वेषु॑ श्रयध्वम्।
प्रथ॑मा द्वि॒तीये॑षु श्रयध्वम्।
द्विती॑यास्तृ॒तीये॑षु श्रयध्वम्।

तृती॑याश्चतु॒र्थेषु॑ श्रयध्वम्।
च॒तु॒र्थाः प॑ञ्च॒मेषु॑ श्रयध्वम्।
प॒ञ्च॒माः ष॒ष्ठेषु॑ श्रयध्वम्॥ **22**॥

ष॒ष्ठाः स॑प्त॒मेषु॑ श्रयध्वम्।
स॒प्त॒मा अ॑ष्ट॒मेषु॑ श्रयध्वम्।
अ॒ष्ट॒मा न॑व॒मेषु॑ श्रयध्वम्।
न॒व॒मा द॑श॒मेषु॑ श्रयध्वम्।
द॒श॒मा ए॑काद॒शेषु॑ श्रयध्वम्।
ए॒का॒द॒शा द्वा॑द॒शेषु॑ श्रयध्वम्।
द्वा॒द॒शास्त्र॑योद॒शेषु॑ श्रयध्वम्।
त्र॒यो॒द॒शाश्च॑तुर्द॒शेषु॑ श्रयध्वम्।
च॒तु॒र्द॒शाः प॑ञ्चद॒शेषु॑ श्रयध्वम्।
प॒ञ्च॒द॒शाः षो॑ड॒शेषु॑ श्रयध्वम्॥ **23**॥

षो॒ड॒शाः स॑प्तद॒शेषु॑ श्रयध्वम्।
स॒प्त॒द॒शा अ॑ष्टाद॒शेषु॑ श्रयध्वम्।
अ॒ष्टा॒द॒शा ए॑कान्नवि॒ग्ं॒शेषु॑ श्रयध्वम्।
ए॒का॒न्न॒वि॒ग्ं॒शा वि॒ग्ं॒शेषु॑ श्रयध्वम्।
वि॒ग्ं॒शा ए॑कवि॒ग्ं॒शेषु॑ श्रयध्वम्।
ए॒क॒वि॒ग्ं॒शा द्वा॑वि॒ग्ं॒शेषु॑ श्रयध्वम्।
द्वा॒वि॒ग्ं॒शास्त्र॑योवि॒ग्ं॒शे॑षु श्रयध्वम्।

त्र॒यो॒वि॒ग्ं॒शाश्च॑तुर्वि॒ग्ं॒शेषु॑ श्रयध्वम्।
च॒तु॒र्वि॒ग्ं॒शाः प॑ञ्चवि॒ग्ं॒शेषु॑ श्रयध्वम्।
प॒ञ्च॒वि॒ग्ं॒शाः ष॑ड्वि॒ग्ं॒शेषु॑ श्रयध्वम्॥ **24**॥

ष॒ड्वि॒ग्ं॒शाः स॑प्तवि॒ग्ं॒शेषु॑ श्रयध्वम्।
स॒प्त॒वि॒ग्ं॒शा अ॑ष्टावि॒ग्ं॒शेषु॑ श्रयध्वम्।
अ॒ष्टा॒वि॒ग्ं॒शा ए॑कान्नत्रि॒ग्ं॒शेषु॑ श्रयध्वम्।
ए॒का॒न्न॒त्रि॒ग्ं॒शास्त्रि॒ग्ं॒शेषु॑ श्रयध्वम्।
त्रि॒ग्ं॒शा ए॑कत्रि॒ग्ं॒शेषु॑ श्रयध्वम्।
ए॒क॒त्रि॒ग्ं॒शा द्वा᳚त्रि॒ग्ं॒शेषु॑ श्रयध्वम्।
द्वा॒त्रि॒ग्ं॒शास्त्र॑यस्त्रि॒ग्ं॒शेषु॑ श्रयध्वम्।
देवा᳚स्त्रिरेकाद॒शास्त्रिस्त्र॑यस्त्रिग्ं॒शाः।
उत्त॑रे भवत।
उत्त॑रवर्त्मान॒ उत्त॑रसत्वानः।
यत्का॑म इ॒दं जु॒होमि॑।
तन्मे॒ समृ॑द्ध्यताम्।
व॒यग्ग् स्या॑म॒ पत॑यो रयी॒णाम्।
भूर्भुव॒ः स्व॑ः स्वाहा᳚॥ **25**॥

ष॒ष्ठेषु॑ श्रयध्वग्ं षोड॒शेषु॑ श्रयध्वग्ं ष॒ड्वि॒ग्ं॒शेषु॑ श्रयध्व॒मुत्त॑रे भव॒तोत्त॑रवर्त्मान॒
उत्त॑रसत्वानश्च॒त्वारि॑ च॥ **2**॥

अग्नाविष्णू सजोषसा।
इमा वर्धन्तु वां गिरः।
द्युम्नैर्वाजेभिरागतम्।
राज्ञी विराज्ञी।
सम्राज्ञी स्वराज्ञी।
अर्चिः शोचिः।
तपो हरो भाः।
अग्निः सोमो बृहस्पतिः।
विश्वे देवा भुवनस्य गोपाः।
ते सर्वे सङ्गत्य।
इदं मे प्रावता वचः।
वयग्ग् स्याम पतयो रयीणाम्।
भूर्भुवः स्वः स्वाहा॥ **26**॥

सङ्गत्य त्रीणि च॥ **3**॥

अन्नपतेऽन्नस्य नो देहि।
अनमीवस्य शुष्मिणः।
प्र प्रदातारं तारिषः।
ऊर्जं नो धेहि द्विपदे चतुष्पदे।
अग्ने पृथिवीपते।
सोम वीरुधां पते।



prapatti dot com sunder kidāmbi

त्वष्टः समिधां पते।
विष्णंवाशानां पते।
मित्रं सत्यानां पते।
वरुंण धर्मणां पते॥ 27॥

मरुतो गणानां पतयः।
रुद्रं पशूनां पते।
इन्द्रौजसां पते।
बृहंस्पते ब्रह्मणस्पते।
आ रुचा रोंचेऽहग्ग् स्वयम्।
रुचा रुंरुचे रोचंमानः।
अतीत्यादः स्वंराभंरेह।
तस्मिन् योनौ प्रजनौ प्रजांयेय।
वयग्ग् स्यांम पतंयो रयीणाम्।
भूर्भुवः स्वः स्वाहां॥ 28॥

वरुंण धर्मणां पते स्वःस्वाहां॥ 4॥

सप्त तें अग्ने समिधः सप्त जिह्वाः।
सप्तर्षंयः सप्त धामं प्रियाणि।
सप्त होत्रां अनुविद्वान्।
सप्त योनीरापृंणस्वा घृतेनं।
प्राची दिक्।



sunder kidambi prapatti dot com sunder kidambi

अ॒ग्निर्दे॒वता᳚।

अ॒ग्निग्ं॒ स दि॒शां दे॒वं दे॒वता॑नामृच्छतु।

यो मै॒तस्यै॑ दि॒शो॑ऽभि॒दास॑ति।

द॒क्षि॒णा दिक्।

इन्द्रो॑ दे॒वता᳚॥ 29॥

इन्द्र॒ग्ं॒ स दि॒शां दे॒वं दे॒वता॑नामृच्छतु।

यो मै॒तस्यै॑ दि॒शो॑ऽभि॒दास॑ति।

प्र॒तीची॒ दिक्।

सोमो॑ दे॒वता᳚।

सोम॒ग्ं॒ स दि॒शां दे॒वं दे॒वता॑नामृच्छतु।

यो मै॒तस्यै॑ दे॒शो॑ऽभि॒दास॑ति।

उदी॑ची॒ दिक्।

मि॒त्रावरु॑णौ दे॒वता᳚।

मि॒त्रावरु॑णौ॒ स दि॒शां दे॒वौ दे॒वता॑नामृच्छतु।

यो मै॒तस्यै॑ दि॒शो॑ऽभि॒दास॑ति॥ 30॥

ऊ॒र्ध्वा दिक्।

बृह॒स्पति॑र्दे॒वता᳚।

बृह॒स्पति॒ग्ं॒ स दि॒शां दे॒वं दे॒वता॑नामृच्छतु।

यो मै॒तस्यै॑ दि॒शो॑ऽभि॒दास॑ति।

इ॒यं दिक्।

अदि॑ति॒र्दे॒वता᳚।
अदि॑ति॒ग्ं॒ स दि॒शां दे॒वीं दे॒वता॑नामृच्छतु।
यो मै॒तस्यै॑ दि॒शो॑ऽभि॒दास॑ति।
पुरु॑षो॒ दिक्।
पुरु॑षो मे॒ कामा॒न्थ्सम॑र्धयतु॥ 31॥

अ॒न्धो जागृ॑विः प्राण।
असा॒वेहि॑।
ब॒धि॒र आ᳚क्रन्दयितरपान।
असा॒वेहि॑।
उ॒षस॑मुषसमशीय।
अ॒हमसो॒ ज्योति॑रशीय।
अ॒हमसो॒ऽपो॑शीय।
व॒यग्ग्॒ स्या॑म॒ पत॑यो र॒यी॒णाम्।
भूर्भु॒वः॒ स्व॑ः स्वाहा᳚॥ 32॥

दक्षि॒णा दिगिन्द्रो॑ दे॒वता॑ मि॒त्रावरु॑णौ॒ स दि॒शां दे॒वौ दे॒वता॑नामृच्छतु॒ यो मै॒तस्यै॑ दि॒शो॑ऽभि॒दास॑त्यर्धयतु॒ नव॑ च॥ 5॥

यत्तेऽचि॑तं॒ यदु॑ चि॒तं ते॑ अग्ने।
यत्त॑ ऊ॒नं यदु॒ तेऽति॑रिक्तम्।
आ॒दि॒त्यास्तदङ्गि॑रसश्चिन्वन्तु।
विश्वे॑ ते दे॒वाश्चिति॒मापू॑रयन्तु।

चि॒तश्चासि॒ संचि॑तश्चास्यग्ने।
ए॒ताव॒ग्॒श्चासि॒ भूयाग्॑श्चास्यग्ने।
लो॒कं पृ॑ण च्छि॒द्रं पृ॑ण।
अथो॑ सीद शि॒वा त्वम्।
इ॒न्द्रा॒ग्नी त्वा॒ बृह॒स्पति॑ः।
अ॒स्मिन् योना॑वसीषदन्न्॥ **33** ॥

तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द।
ता अ॑स्य॒ सूद॑दोहसः।
सोमग्ग्॑ श्रीणन्ति॒ पृश्न॑यः।
जन्म॑न्दे॒वानां॒ विश॑ः।
त्रि॒ष्वारो॑च॒ने दि॒वः।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द।
अग्ने॑ दे॒वाग्ं॒ इ॒हाव॑ह।
ज॒ज्ञा॒नो वृ॒क्तब॑र्हिषे।
असि॒ होता॑ न॒ ईड्य॑ः।
अग॑न्म म॒हा मन॑सा॒ यवि॑ष्ठम्॥ **34** ॥

यो दी॒दाय॒ समि॑द्धस्स्वे दु॑रो॒णे।
चि॒त्रभा॑नू॒ रोद॑सी अ॒न्तरु॒र्वी।
स्वाहु॑तं वि॒श्वत॑ः प्र॒त्यञ्च᳚म्।
मे॒धा॒का॒रं वि॒दथ॑स्य प्र॒साध॑नम्।

अ॒ग्निग्ं होता॑रं परि॒भूत॑मं म॒तिम्।
त्वामर्भ॑स्य ह॒विषः॑ समा॒नमित्।
त्वां म॒हो वृ॑णते॒ नरो॒ नान्यं त्वत्।
म॒नु॒ष्वत्त्वा॒ निधी॑महि।
म॒नु॒ष्वथ्समि॑धीमहि।
अग्ने॑ मनु॒ष्वद॑ङ्गिरः॥ **35**॥

दे॒वान्दे॑वाय॒ते य॑ज।
अ॒ग्निर्हि वा॒जिनं॑ वि॒शे।
ददा॑ति वि॒श्वच॑र्षणिः।
अ॒ग्नी रा॒ये स्वा॒भुव᳚म्।
स प्री॒तो या॑ति॒ वार्य᳚म्।
इषग्ग्॑ स्तो॒तृभ्य॒ आभ॑र।
पृ॒ष्टो दि॒वि पृ॒ष्टो अ॒ग्निः पृ॑थि॒व्याम्।
पृ॒ष्टो विश्वा॒ ओष॑धी॒रावि॑वेश।
वै॒श्वा॒न॒रः सह॑सा पृ॒ष्टो अ॒ग्निः।
स नो॒ दिवा॒ स रि॒षः पा॑तु॒ नक्त᳚म्॥ **36**॥

अ॒सी॒ष॒द॒न् यवि॑ष्ठमङ्गिरो॒ नक्त᳚म्॥ **6**॥

अ॒यं वाव यः पव॑ते।
सो᳚ऽग्निर्ना॑चिके॒तः।
स यत्प्राङ्पव॑ते।

तदस्य शिरः।
अथ यद्दक्षिणा।
स दक्षिणः पक्षः।
अथ यत्प्रत्यक्।
तत्पुच्छँम्।
यदुदङ्।
स उत्तरः पक्षः॥ 37॥

अथ यथ्संवाति।
तदस्य समञ्चनं च प्रसारणं च।
अथो सम्पदेवास्य सा।
सगं ह वा अस्मै स कामः पद्यते।
यत्कामो यजते।
योँऽग्निं नाचिकेतं चिनुते।
य उं चैनमेवं वेद।
यो ह वा अग्नेर्नाचिकेतस्यायतनं प्रतिष्ठां वेद।
आयतनवान्भवति।
गच्छति प्रतिष्ठाम्॥ 38॥

हिरण्यं वा अग्नेर्नाचिकेतस्यायतनं प्रतिष्ठा।
य एवं वेद।
आयतनवान्भवति।



sunder kidāmbi prapatti dot com sunder kidāmbi

गच्छ॑ति प्रति॒ष्ठाम्।
यो ह॒ वा अ॒ग्नेर्ना॑चिके॒तस्य॒ शरी॑रं॒ वेद॑।
सश॑रीर ए॒व स्व॒र्गं लो॒कमे॑ति।
हिर॑ण्यं॒ वा अ॒ग्नेर्ना॑चिके॒तस्य॒ शरी॑रम्।
य ए॒वं वेद॑।
सश॑रीर ए॒व स्व॒र्गं लो॒कमे॑ति।
अथो॒ यथा॑ रु॒क्म उत्त॑प्तो भा॒य्यात्॥ **39**॥

ए॒वमे॒व स तेज॑सा॒ यश॑सा।
अ॒स्मिग्ग्श्च॑ लो॒के॑ऽमुष्मिग्ग्॑श्च भाति।
उ॒रवो॑ ह॒ वै नामै॒ते लो॒काः।
येऽव॑रेणादि॒त्यम्।
अथ॑ है॒ते वरी॑याग्ंसो लो॒काः।
ये पर॑णादि॒त्यम्।
अन्त॑वन्तग्ं ह॒ वा ए॒ष क्ष॒य्यं लो॒कं ज॑यति।
योऽव॑रेणादि॒त्यम्।
अथ॑ है॒षोऽन॒न्तम॑पा॒रम॑क्ष॒य्यं लो॒कं ज॑यति।
यः पर॑णादि॒त्यम्॥ **40**॥

अ॒न॒न्तग्ं ह॒ वा अ॑पा॒रम॑क्ष॒य्यं लो॒कं ज॑यति।
योँऽग्निं ना॑चिके॒तं चि॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑।

अथो॒ यथा॒ रथे॒ तिष्ठ॒न्पक्षांसी पर्या॒वर्तमाने प्र॒त्यपेँक्षते।
ए॒वमंहोरा॒त्रे प्र॒त्यपेँक्षते।
नास्यांहोरा॒त्रे लो॒कमाँप्नुतः।
योँऽग्निं नांचिके॒तं चिंनु॒ते।
य उं चैनमे॒वं वेदं॥ **41**॥

उत्तंरः प॒क्षो गच्छंति प्रति॒ष्ठां भा॒ग्याद्यः परेंणाऽऽदि॒त्यम॒ष्टौ चं॥ **7**॥

उ॒शन् ह॒ वै वांजश्रव॒सः सर्ववेद॒सं ददौ।
तस्यं ह॒ नचिंकेता॒ नामं पु॒त्र आंस।
तग्ं हं कुमा॒रग्ं सन्तँम्।
दक्षिणासु नी॒यमानासु श्र॒द्धा विंवेश।
स होंवाच।
तत॒ कस्मै॒ मां दाँस्य॒सीतिं।
द्वि॒तीयं तृ॒तीयँम्।
तग्ं ह॒ परीत उवाच।
मृ॒त्यवेँ त्वा दद॒मीतिं।
तग्ं ह॒ स्मोत्थितं॒ वाग॒भिवंदति॥ **42**॥

गौतंम कुमा॒रमितिं।
स होंवाच।
परेंहि मृ॒त्योर्गृ॒हान्।
मृ॒त्यवे॒ वै त्वांऽदा॒मितिं।

तं वै प्र॒वस॑न्तं ग॒न्तासीति॑ होवाच।
तस्य॑ स्म ति॒स्रो रात्री॒रनाँ॑श्वान्गृ॒हे व॑सतात्।
स यदि॑ त्वा पृ॒च्छेत्।
कुमा॑र॒ कति॒ रात्री॑रवाथ्सी॒रिति॑।
ति॒स्र इति॒ प्रति॑ब्रूतात्।
किं प्र॑थ॒माग्ं रात्रि॑माश्ना॒ इति॑॥ **43**॥

प्र॒जां त॒ इति॑।
किं द्वि॒तीया॒मिति॑।
प॒शूग्स्त॒ इति॑।
किं तृ॒तीया॒मिति॑।
सा॒धु॒कृ॒त्यां त॒ इति॑।
तं वै प्र॒वस॑न्तं जगाम।
तस्य॑ ह ति॒स्रो रात्री॒रनाँ॑श्वान्गृ॒ह उ॑वास।
तमा॒गत्य॑ पप्रच्छ।
कुमा॑र॒ कति॒ रात्री॑रवाथ्सी॒रिति॑।
ति॒स्र इति॒ प्रत्यु॑वाच॥ **44**॥

किं प्र॑थ॒माग्ं रात्रि॑माश्ना॒ इति॑।
प्र॒जां त॒ इति॑।
किं द्वि॒तीया॒मिति॑।
प॒शूग्स्त॒ इति॑।

किं तृ॒तीया॒मिति॑।
सा॒धु॒कृ॒त्यां त॒ इति॑।
नम॑स्ते अस्तु भगव॒ इति॑ होवाच।
वर॑ं वृणी॒ष्वेति॑।
पि॒तर॑मे॒व जीव॑न्नया॒नीति॑।
द्वि॒तीय॑ं वृणी॒ष्वेति॑॥ **45**॥

इ॒ष्टा॒पू॒र्तयो॒र्मेऽक्षि॑तिं ब्रू॒हीति॑ होवाच।
तस्मै॑ हैतम॒ग्निं ना॑चिके॒तमु॑वाच।
ततो॒ वै तस्यै॑ष्टापू॒र्ते ना क्षी॑येते।
नास्यै॑ष्टापू॒र्ते क्षी॑येते।
यो॑ऽग्निं ना॑चिके॒तं चि॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑।
तृ॒तीय॑ं वृणी॒ष्वेति॑।
पु॒न॒र्मृ॒त्योर्मेऽप॑जितिं ब्रू॒हीति॑ होवाच।
तस्मै॑ है॒तम॒ग्निं ना॑चिके॒तमु॑वाच।
ततो॒ वै सोऽप॑ पुनर्मृ॒त्युम॑जयत्॥ **46**॥

अप॑ पुनर्मृ॒त्युं ज॑यति।
यो॑ऽग्निं ना॑चिके॒तं चि॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑।
प्र॒जाप॑ति॒र्वै प्र॒जाका॑म॒स्तपो॑ऽतप्यत।

स हिर॑ण्य॒मुदा᳚स्यत्।
तद॒ग्नौ प्रास्य॑त्।
तद॑स्मै॒ नाच्छ॑दयत्।
तद्द्वि॒तीय॒ं प्रास्य॑त्।
तद॑स्मै॒ नैवाच्छ॑दयत्।
तत्तृ॒तीय॒ं प्रास्य॑त्॥ **47**॥

तद॑स्मै॒ नैवाच्छ॑दयत्।
तदा॒त्मन्ने॒व हृ॑द॒य्ये᳚ऽग्नौ वै᳚श्वान॒रे प्रास्य॑त्।
तद॑स्मा अच्छदयत्।
तस्मा॒द्धिर॑ण्य॒ं कनि॑ष्ठ॒ं धना॑नाम्।
भु॒ञ्जत्प्रि॒यत॑मम्।
हृ॒द॒य॒जग्ं हि।
स वै तमे॒व नावि॑न्दत्।
यस्मै॒ तां दक्षि॑णा॒मने᳚ष्यत्।
ताग् स्वाये॒व हस्ता॑य॒ दक्षि॑णायानयत्।
तां प्रत्य॑गृह्णात्॥ **48**॥

दक्षा॑य त्वा॒ दक्षि॑णा॒ं प्रति॑गृह्णा॒मीति॑।
सो॑ऽदक्षत॒ दक्षि॑णां प्रति॒गृह्य॑।
दक्ष॑ते ह॒ वै दक्षि॑णां प्रति॒गृह्य॑।
य ए॒वं वेद॑।

sunder kidāmbi prapatti dot com sunder kidāmbi

एतद्ध स्म वै तद्विद्वाग्ंसो वाजश्रवसा गोतमाः।
अप्यनूदेश्यां दक्षिणां प्रतिगृह्णन्ति।
उभयेन वयं दक्षिष्यामह एव दक्षिणां प्रतिगृह्येति।
तेऽदक्षन्त दक्षिणां प्रतिगृह्य।
दक्षते ह वै दक्षिणां प्रतिगृह्य।
य एवं वेद।
प्रहान्यं ब्लीनाति॥ **49** ॥

वदत्याश्रा इत्युवाच द्वितीयं वृणीष्वेत्यजयत्तृतीयं प्रास्यदगृह्णाद्य एवं वेदैकं च॥ **8** ॥

तग् हैतमेके पशुबन्ध एवोत्तरवेद्यां चिन्वते।
उत्तरवेदिसंम्मित एषोऽग्निरिति वदन्तः।
तन्न तथा कुर्यात्।
एतमग्निं कामेन व्यर्द्धयेत्।
स एनं कामेन व्यृद्धः।
कामेन व्यर्द्धयेत्।
सौम्ये वावैनमध्वरे चिन्वीत।
यत्र वा भूयिष्ठा आहुतयो हूयेरन्।
एतमग्निं कामेन समर्द्धयति।
स एनं कामेन समृद्धः॥ **50** ॥

कामेन समर्द्धयति।
अथ हैनं पुरर्षयः।

उ॒त्त॒र॒वे॒द्यामे॒व स॒त्रियं॑मचिन्वत।
त॒तो॒ वै तेऽविं॑न्दन्त प्र॒जाम्।
अ॒भि स्व॒र्गं लो॒कमं॑जयन्न्।
वि॒न्दत॑ ए॒व प्र॒जाम्।
अ॒भि स्व॒र्गं लो॒कं जं॑यति।
यो॑ऽग्निं ना॑चिके॒तं चिं॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑।
अथ॑ हैनं वा॒युर्ऋद्धिं॑कामः॥ **51**॥

य॒था॒न्यु॒प्तमे॒वोपं॑दधे।
त॒तो॒ वै स ए॒तामृद्धिं॑माध्नोत्।
यामि॒दं वा॒युर्ऋ॒द्धः।
ए॒तामृद्धिं॑मृध्नोति।
यामि॒दं वा॒युर्ऋ॒द्धः।
यो॑ऽग्निं ना॑चिके॒तं चिं॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑।
अथ॑ हैनं गोब॒लो वार्ष्णः॑ प॒शुका॑मः।
पाङ्क्तं॑मे॒व चिं॑क्ये।
पञ्च॑ पु॒रस्ता॑त्॥ **52**॥

पञ्च॑ दक्षि॒णतः।
पञ्च॑ प॒श्चात्।

पश्चो᳚त्तर॒तः।
एका॒ं मध्ये᳚।
ततो॒ वै स स॒हस्र॑ं प॒शून्प्राप्नो᳚त्।
प्र स॒हस्र॑ं प॒शूना᳚प्नोति।
यो᳚ऽग्निं ना॑चिके॒तं चि॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑।
अथ॑ हैनं प्र॒जाप॑ति॒र्ज्यैष्ठ्य॑कामो॒
यश॑स्कामः प्र॒जन॑नकामः।
त्रि॒वृत॑मे॒व चि॑क्ये॥ **53**॥

स॒प्त पु॒रस्ता᳚त्।
ति॒स्रो द॑क्षिण॒तः।
स॒प्त प॒श्चात्।
ति॒स्र उ॑त्तर॒तः।
एका॒ं मध्ये᳚।
ततो॒ वै स प्र यशो॒ ज्यैष्ठ्य॑माप्नोत्।
ए॒तां प्र॒जा॑ति॒ं प्राजा॑यत।
यामि॒दं प्र॒जाः प्र॒जाय॑न्ते।
त्रि॒वृद्वै ज्यैष्ठ्य᳚म्।
मा॒ता पि॒ता पु॒त्रः॥ **54**॥

त्रिवृत्प्रजननम्।
उपस्थो योनिर्मध्यमा।
प्र यशो ज्यैष्ठ्यमाप्नोति।
एतां प्रजातिं प्रजायते।
यामिदं प्रजाः प्रजायन्ते।
योऽग्निं नाचिकेतं चिनुते।
य उ चैनमेवं वेद।
अथ हैनमिन्द्रो ज्यैष्ठ्यकामः।
ऊर्ध्वा एवोपदधे।
ततो वै स ज्यैष्ठ्यमगच्छत्॥ **55**॥

ज्यैष्ठ्यं गच्छति।
योऽग्निं नाचिकेतं चिनुते।
य उ चैनमेवं वेद।
अथ हैनमसावादित्यः स्वर्गकामः।
प्राचीरेवोपदधे।
ततो वै सोऽभि स्वर्गं लोकमजयत्।
अभि स्वर्गं लोकं जयति।
योऽग्निं नाचिकेतं चिनुते।
य उ चैनमेवं वेद।
स यदीच्छेत्॥ **56**॥

sunder kidāmbi prapatti dot com sunder kidāmbi

तेजस्वी यशस्वी ब्रह्मवर्चसी स्यामिति।
प्राङ्गहोतुर्धिष्ण्याद्दुथ्सर्पेत्।
येयं प्रागाद्यशस्वती।
सा मा प्रोर्णोतु।
तेजसा यशसा ब्रह्मवर्चसेनेति।
तेजस्व्येव यशस्वी ब्रह्मवर्चसी भवति।
अथ यदीच्छेत्।
भूयिष्ठं मे श्रद्दधीरन्न्।
भूयिष्ठा दक्षिणा नयेयुरिति।
दक्षिणासु नीयमानासु प्राच्येहि प्राच्येहीति प्राची
जुषाणा वेत्वाज्यस्य स्वाहेति
स्रुवेणोपहत्याहवनीये जुहुयात्॥ **57**॥

भूयिष्ठमेवास्मै श्रद्दधते।
भूयिष्ठा दक्षिणा नयन्ति।
पुरीषमुपधाय।
चितिक्लृप्तिभिरभिमृश्य।
अग्निं प्रणीयोपसमाधाय।
चतस्र एता आहुतीर्जुहोति।
त्वमग्ने रुद्र इति शतरुद्रीयस्य रूपम्।
अग्नाविष्णू इति वसोर्धारायाः।

अन्नंपत इत्यंन्नहोमः।
सप्त ते अग्ने समिधः सप्त जिह्वा इति विश्वप्रीः॥ **58**॥

समृद्ध ऋद्धिंकामः पुरस्तांच्चिक्ये पुत्रोऽगच्छदिच्छेज्जुहुयाद्विश्वप्रीः॥ **9**॥

पुरर्षयो वायुर्गोबलस्सहस्रं प्रजापतिस्त्रिवृदिन्द्रोऽसावादित्यस्स यदीच्छेत्॥

यां प्रथमामिष्टंकामुपदधाति।
इमं तया लोकमभिजंयति।
अथो या अस्मिन्लोके देवताः।
तासागं सायुज्यगं सलोकतामाप्नोति।
यां द्वितीयामुपदधाति।
अन्तरिक्षलोकं तयाऽभिजंयति।
अथो या अंन्तरिक्षलोके देवताः।
तासागं सायुज्यगं सलोकतामाप्नोति।
यां तृतीयामुपदधाति।
अमुं तया लोकमभिजंयति॥ **59**॥

अथो या अमुष्मिंन्लोके देवताः।
तासागं सायुज्यगं सलोकतामाप्नोति।
अथो या अमूरितंरा अष्टादंश।
य एवामी उरवंश्च वरींयागंसश्च लोकाः।
तानेव ताभिंरभिजंयति।
कामचारो ह वा अंस्योरुषुं च

वरी॑यस्सु च लो॒केषु॑ भवति।
यो᳚ऽग्निं ना॑चिके॒तं चि॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑।
सं॒व॒थ्स॒रो वा अ॒ग्निर्ना॑चिके॒तः।
तस्य॑ वस॒न्तः शिरः॑॥ **60**॥

ग्री॒ष्मो दक्षि॑णः प॒क्षः।
व॒र्॒षा उत्त॑रः।
श॒रत्पुच्छ᳚म्।
मासा᳚ः कर्मका॒राः।
अ॒हो॒रा॒त्रे श॑तरु॒द्रीय᳚म्।
प॒र्जन्यो॒ वसो॒र्धारा᳚।
यथा॒ वै प॒र्जन्य॒ः सुवृ॑ष्टं वृ॒ष्ट्वा।
प्र॒जाभ्य॒ः सर्वा॒न्कामा᳚न्थ्सं॑पू॒रय॑ति।
ए॒वमे॒व स तस्य॒ सर्वा॒न्कामा॒न्थ्संपू॑रयति।
यो᳚ऽग्निं ना॑चिके॒तं चि॑नु॒ते॥ **61**॥

य उ॑ चैनमे॒वं वेद॑।
सं॒व॒थ्स॒रो वा अ॒ग्निर्ना॑चिके॒तः।
तस्य॑ वस॒न्तः शिरः॑।
ग्री॒ष्मो दक्षि॑णः प॒क्षः।
व॒र्॒षाः पुच्छ᳚म्।

sunder kidāmbi prapatti dot com sunder kidāmbi

श॒रदुत्त॑रः प॒क्षः।
हे॒म॒न्तो मध्यँ॑म्।
पू॒र्व॒प॒क्षाश्चित॑यः।
अ॒प॒र॒प॒क्षाः पुरी॑षम्।
अ॒हो॒रा॒त्राणीष्ट॑काः।
ए॒ष वाव सोँऽग्निर॑ग्नि॒मय॑ः पुन॒र्ण॒वः।
अ॒ग्नि॒मयो॑ ह॒ वै पु॑नर्ण॒वो भू॒त्वा।
स्व॒र्गं लो॒कमे॑ति।
आ॒दि॒त्यस्य॒ सायु॑ज्यम्।
योँऽग्निं ना॑चिके॒तं चि॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑॥ 62॥

अ॒मुं तया॑ लो॒कम॒भिज॑यति॒ शिर॑श्चिनु॒त इष्ट॑का॒ष्षट्च॑॥ 10॥

लो॒कस्त्वम॒ग्नेऽग्ना॑विष्णू॒ अन्न॑पते स॒प्त ते॑ अग्ने॒ यत्तेऽचि॑तम॒यं वावोशन् ह॒ वै तगं हैतं यां प्र॑थ॒मामिष्ट॑कां॒ दश॑॥ 10॥

लो॒क आ॑दि॒त्य ओजोँऽस्यू॒र्ध्वा दिग॑न॒न्तगं ह॒ वै कामे॑न ग्री॒ष्मो द्विष॑ष्टिः॥ 62॥

लो॒को॑ऽसि॒ वेद॑॥

॥ हरि॑ः ओ(३)म्॥

॥ इति कृष्णयजुर्वेदीय तैत्तिरीय ब्राह्मणे तृतीयाष्टके एकादशः प्रश्नः समाप्तः॥